# ॥ શ્રીપુરુષોત્તમસહસ્રનામસ્તોત્રમ્ ॥

.. Shri Purushottamasahasranamastotra ..

sanskritdocuments.org

August 20, 2017

# .. Shri Purushottamasahasranamastotra ..

# ॥ શ્રીપુરુષોત્તમસહસ્રનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : puruShottamasahasranAmastotra

File name : puruShottamasahasranAmastotra.itx

Category : sahasranAma, vishhnu, vishnu_misc, stotra, vallabhaachaarya

Location : doc_vishhnu

Author : Vallabhacharya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Sunderh Hattangadi sunderh at hotmail.com

Description-comments : http://www.parikhparivar.com

Latest update : March 5, 2013

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીપુરુષોત્તમસહસ્રનામસ્તોત્રમ્ ॥

### વિનિયોગઃ

પુરાણપુરુષો વિષ્ણુઃ પુરુષોત્તમ ઉચ્યતે ।
નામ્નાં સહસ્રં વક્ષ્યામિ તસ્ય ભાગવતોદ્ધૃતમ્ ॥ ૧॥

યસ્ય પ્રસાદાદ્વાગીશાઃ પ્રજેશા વિભવોન્નતાઃ ।
ક્ષુદ્રા અપિ ભવન્ત્યાશુ શ્રીકૃષ્ણં તં નતોઽસ્મ્યહમ્ ॥ ૨॥

અનન્તા એવ કૃષ્ણસ્ય લીલા નામપ્રવર્તિકાઃ ।
ઉક્તા ભાગવતે ગૂહાઃ પ્રકટા અપિ કુત્રચિત્ ॥ ૩॥

અતસ્તાનિ પ્રવક્ષ્યામિ નામાનિ મુરવૈરિણઃ ।
સહસ્રં યૈસ્તુ પઠિતૈઃ પઠિતં સ્યાચ્છુકામૃતમ્ ॥ ૪॥

કૃષ્ણનામસહસ્રસ્ય ઋષિરગ્નિર્નિરૂપિતઃ ।
ગાયત્રી ચ તથા છન્દો દેવતા પુરુષોત્તમઃ ॥ ૫॥

વિનિયોગઃ સમસ્તેષુ પુરુષાર્થેષુ વૈ મતઃ ।
બીજં ભક્તપ્રિયઃ શક્તિઃ સત્યવાગુચ્યતે હરિઃ ॥ ૬॥

ભક્તોદ્ધરણયત્નસ્તુ મન્ત્રોઽત્ર પરમો મતઃ ।
અવતારિતભક્તાંશઃ કીલકં પરિકીર્તિતમ્ ॥ ૭॥

અસ્ત્રં સર્વસમર્થશ્ચ ગોવિન્દઃ કવચં મતમ્ ।
પુરુષો ધ્યાનમત્રોક્તઃ સિદ્ધિઃ શરણસંસ્મૃતિઃ ॥ ૮॥

## ૧ પ્રથમસ્કન્ધનામાનિ

### અધિકારલીલા

શ્રીકૃષ્ણઃ સચ્ચિદાનન્દો નિત્યલીલાવિનોદકૃત્ ।
સર્વાગમવિનોદી ચ લક્ષ્મીશઃ પુરુષોત્તમઃ ॥ ૯॥

આદિકાલઃ સર્વકાલઃ કાલાત્મા માયયાવૃતઃ ।
ભક્તોદ્ધારપ્રયત્નાત્મા જગત્કર્તા જગન્મયઃ ॥ ૧૦॥

નામલીલાપરો વિષ્ણુર્વ્યાસાત્મા શુકમોક્ષદઃ ।
વ્યાપિવૈકુણ્ઠદાતા ચ શ્રીમદ્ભાગવતાગમઃ ॥ ૧૧॥

શુકવાગમૃતાબ્ધીન્દુઃ શૌનકાદ્યખિલેષ્ટદઃ ।
ભક્તિપ્રવર્તકસ્ત્રાતા વ્યાસચિન્તાવિનાશકઃ ॥ ૧૨॥

સર્વસિદ્ધાન્તવાગાત્મા નારદાદ્યખિલેષ્ટદઃ ।
અન્તરાત્મા ધ્યાનગમ્યો ભક્તિરત્નપ્રદાયકઃ ॥ ૧૩॥

મુક્તોપસૃપ્યઃ પૂર્ણાત્મા મુક્તાનાં રતિવર્ધનઃ ।
ભક્તકાર્યૈકનિરતો દ્રૌણ્યસ્ત્રવિનિવારકઃ ॥ ૧૪॥

ભક્તસ્મયપ્રણેતા ચ ભક્તવાક્પરિપાલકઃ ।
બ્રહ્મણ્યદેવો ધર્માત્મા ભક્તાનાં ચ પરીક્ષકઃ ॥ ૧૫॥

આસન્નહિતકર્તા ચ માયાહિતકરઃ પ્રભુઃ ।
ઉત્તરાપ્રાણદાતા ચ બ્રહ્માસ્ત્રવિનિવારકઃ ॥ ૧૬॥

સર્વતઃ પાણ્ડવપતિઃ પરીક્ષિચ્છુદ્ધિકારણમ્ ।
ગૂહાત્મા સર્વવેદેષુ ભક્તૈકહૃદયઙ્ગમઃ ॥ ૧૭॥

કુન્તીસ્તુત્યઃ પ્રસન્નાત્મા પરમાદ્ભુતકાર્યકૃત્ ।
ભીષ્મમુક્તિપ્રદઃ સ્વામી ભક્તમોહનિવારકઃ ॥ ૧૮॥

સર્વાવસ્થાસુ સંસેવ્યઃ સમઃ સુખહિતપ્રદઃ ।
કૃતકૃત્યઃ સર્વસાક્ષી ભક્તસ્ત્રીરતિવર્ધનઃ ॥ ૧૯॥

સર્વસૌભાગ્યનિલયઃ પરમાશ્ચર્યરૂપધૃક્ ।
અનન્યપુરુષસ્વામી દ્વારકાભાગ્યભાજનમ્ ॥ ૨૦॥

બીજસંસ્કારકર્તા ચ પરીક્ષિજ્જાનપોષકઃ ।
સર્વત્રપૂર્ણગુણકઃ સર્વભૂષણભૂષિતઃ ॥ ૨૧॥

સર્વલક્ષણદાતા ચ ધૃતરાષ્ટ્રવિમુક્તિદઃ ।
સન્માર્ગરક્ષકો નિત્યં વિદુરપ્રીતિપૂરકઃ ॥ ૨૨॥

લીલાવ્યામોહકર્તા ચ કાલધર્મપ્રવર્તકઃ ।

પાણવાનાં મોક્ષદાતા પરીક્ષિદ્ભાગ્યવર્ધનઃ ॥ ૨૩॥

કલિનિગ્રહકર્તા ચ ધર્માદીનાં ચ પોષકઃ ।
સત્સઙ્ગજાનહેતુશ્ચ શ્રીભાગવતકારણમ્ ॥ ૨૪॥

પ્રાકૃતાદૃષ્ટમાર્ગશ્ચ.. .. .. .. .. .. continued

# ૨ દ્વિતીયસ્કન્ધનામાનિ

## જ્ઞાન-સાધન-લીલા

.. .. .. .. .. .. .. .. .. .. .. .. .. શ્રોતવ્યઃ સકલાગમૈઃ ।
કીર્તિતવ્યઃ શુદ્ધભાવૈઃ સ્મર્તવ્યશ્ચાત્મવિત્તમૈઃ ॥ ૨૫॥

અનેકમાર્ગકર્તા ચ નાનાવિધગતિપ્રદઃ ।
પુરુષઃ સકલાધારઃ સત્ત્વૈકનિલયાત્મભૂઃ ॥ ૨૬॥

સર્વધ્યેયો યોગગમ્યો ભક્ત્યા ગ્રાહ્યઃ સુરપ્રિયઃ ।
જન્માદિસાર્થકકૃતિર્લીલાકર્તા પતિઃ સતામ્ ॥ ૨૭॥

આદિકર્તા તત્ત્વકર્તા સર્વકર્તા વિશારદઃ ।
નાનાવતારકર્તા ચ બ્રહ્માવિર્ભાવકારણમ્ ॥ ૨૮॥

દશલીલાવિનોદી ચ નાનાસૃષ્ટિપ્રવર્તકઃ ।
અનેકકલ્પકર્તા ચ સર્વદોષવિવર્જિતઃ ॥ ૨૯॥

# 3 તૃતીયસ્કન્ધનામાનિ

## સર્ગલીલા

વૈરાગ્યહેતુસ્તીર્થાત્મા સર્વતીર્થફલપ્રદઃ ।
તીર્થશુદ્ધૈકનિલયઃ સ્વમાર્ગપરિપોષકઃ ॥ ૩૦॥

તીર્થકીર્તિર્ભક્તગમ્યો ભક્તાનુશયકાર્યકૃત્ ।
ભક્તતુલ્યઃ સર્વતુલ્યઃ સ્વેચ્છાસર્વપ્રવર્તકઃ ॥ ૩૧॥

ગુણાતીતોઽનવદ્યાત્મા સર્ગલીલાપ્રવર્તકઃ ।
સાક્ષાત્સર્વજગત્કર્તા મહદાદિપ્રવર્તકઃ ॥ ૩૨॥

માયાપ્રવર્તકઃ સાક્ષી માયારતિવિવર્ધનઃ ।
આકાશાત્મા ચતુર્મૂર્તિશ્ચતુર્ધા ભૂતભાવનઃ ॥ ૩૩॥

રજઃપ્રવર્તકો બ્રહ્મા મરીચ્યાદિપિતામહઃ ।
વેદકર્તા યજ્ઞકર્તા સર્વકર્તાઽમિતાત્મકઃ ॥ ૩૪॥

અનેકસૃષ્ટિકર્તા ચ દશધાસૃષ્ટિકારકઃ ।
યજ્ઞાઙ્ગો યજ્ઞવારાહો ભૂધરો ભૂમિપાલકઃ ॥ ૩૫॥

સેતુર્વિધરણો જૈત્રો હિરણ્યાક્ષાન્તકઃ સુરઃ ।
દિતિકશ્યપકામૈકહેતુસૃષ્ટિપ્રવર્તકઃ ॥ ૩૬॥

દેવાભયપ્રદાતા ચ વૈકુણ્ઠાધિપતિર્મહાન્ ।
સર્વગર્વપ્રહારી ચ સનકાદ્યખિલાર્થદઃ ॥ ૩૭॥

સર્વાશ્વાસનકર્તા ચ ભક્તતુલ્યાહવપ્રદઃ ।
કાલલક્ષણહેતુશ્ચ સર્વાર્થજ્ઞાપકઃ પરઃ ॥ ૩૮॥

ભક્તોન્નતિકરઃ સર્વપ્રકારસુખદાયકઃ ।
નાનાયુદ્ધપ્રહરણો બ્રહ્મશાપવિમોચકઃ ॥ ૩૯॥

પુષ્ટિસર્ગપ્રણેતા ચ ગુણસૃષ્ટિપ્રવર્તકઃ ।
કર્દમેષ્ટપ્રદાતા ચ દેવહૂત્યખિલાર્થદઃ ॥ ૪૦॥

શુક્લનારાયણઃ સત્યકાલધર્મપ્રવર્તકઃ ।
જ્ઞાનાવતારઃ શાન્તાત્મા કપિલઃ કાલનાશકઃ ॥ ૪૧॥

ત્રિગુણાધિપતિઃ સાઙ્ખ્યશાસ્ત્રકર્તા વિશારદઃ ।
સર્ગદૂષણહારી ચ પુષ્ટિમોક્ષપ્રવર્તકઃ ॥ ૪૨॥

લૌકિકાનન્દદાતા ચ બ્રહ્માનન્દપ્રવર્તકઃ ।
ભક્તિસિદ્ધાન્તવક્તા ચ સગુણજ્ઞાનદીપકઃ ॥ ૪૩॥

આત્મપ્રદઃ પૂર્ણકામો યોગાત્મા યોગભાવિતઃ ।
જીવન્મુક્તિપ્રદઃ શ્રીમાનન્યભક્તિપ્રવર્તકઃ ॥ ૪૪॥

કાલસામર્થ્યદાતા ચ કાલદોષનિવારકઃ ।
ગર્ભોત્તમજ્ઞાનદાતા કર્મમાર્ગનિયામકઃ ॥ ૪૫॥

સર્વમાર્ગનિરાકર્તા ભક્તિમાર્ગૈકપોષકઃ ।
સિદ્ધિહેતુઃ સર્વહેતુઃ સર્વાશ્ચર્યૈકકારણમ્ ॥ ૪૬॥

ચેતનાચેતનપતિઃ સમુદ્રપરિપૂજિતઃ ।
સાઙ્ખ્યાચાર્યસ્તુતઃ સિદ્ધપૂજિતઃ સર્વપૂજિતઃ ॥ ૪૭॥

# ૪ ચતુર્થસ્કન્ધનામાનિ

## વિસર્ગલીલા

વિસર્ગકર્તા સર્વેશઃ કોટિસૂર્યસમપ્રભઃ ।
અનન્તગુણગમ્ભીરો મહાપુરુષપૂજિતઃ ॥ ૪૮॥

અનન્તસુખદાતા ચ બ્રહ્મકોટિપ્રજાપતિઃ ।
સુધાકોટિસ્વાસ્થ્યહેતુઃ કામધુક્કોટિકામદઃ ॥ ૪૯॥

સમુદ્રકોટિગમ્ભીરસ્તીર્થકોટિસમાહ્વયઃ ।
સુમેરુકોટિનિષ્કમ્પઃ કોટિબ્રહ્માણ્ડવિગ્રહઃ ॥ ૫૦॥

કોટ્યશ્વમેધપાપઘ્નો વાયુકોટિમહાબલઃ ।
કોટીન્દુજગદાનન્દી શિવકોટિપ્રસાદકૃત્ ॥ ૫૧॥

સર્વસદ્ગુણમાહાત્મ્યઃ સર્વસદ્ગુણભાજનમ્ ।
મન્વાદિપ્રેરકો ધર્મો યજ્ઞનારાયણઃ પરઃ ॥ ૫૨॥

આકૂતિસૂનુર્દેવેન્દ્રો રુચિજન્માઽભયપ્રદઃ ।
દક્ષિણાપતિરોજસ્વી ક્રિયાશક્તિઃ પરાયણઃ ॥ ૫૩॥

દત્તાત્રેયો યોગપતિર્યોગમાર્ગપ્રવર્તકઃ ।
અનસૂયાગર્ભરત્નમૃષિવંશવિવર્ધનઃ ॥ ૫૪॥

ગુણત્રયવિભાગજ્ઞશ્ચતુર્વર્ગવિશારદઃ ।
નારાયણો ધર્મસૂનુર્મૂર્તિપુણ્યયશસ્કરઃ ॥ ૫૫॥

સહસ્રકવચચ્છેદી તપઃસારો નરપ્રિયઃ ।
વિશ્વાનન્દપ્રદઃ કર્મસાક્ષી ભારતપૂજિતઃ ॥ ૫૬॥

અનન્તાદ્ભુતમાહાત્મ્યો બદરીસ્થાનભૂષણમ્ ।
જિતકામો જિતક્રોધો જિતસઙ્ગો જિતેન્દ્રિયઃ ॥ ૫૭॥

ઉર્વશીપ્રભવઃ સ્વર્ગસુખદાયી સ્થિતિપ્રદઃ ।
અમાની માનદો ગોપ્તા ભગવચ્છાસ્ત્રબોધકઃ ॥ ૫૮॥

બ્રહ્માદિવન્દ્યો હંસશ્રીર્માયાવૈભવકારણમ્ ।
વિવિધાનન્તસર્ગાત્મા વિશ્વપૂરણતત્પરઃ ॥ ૫૯॥

યજ્ઞજીવનહેતુશ્ચ યજ્ઞસ્વામીષ્ટબોધકઃ ।
નાનાસિદ્ધાન્તગમ્યશ્ચ સપ્તતન્તુશ્ચ ષડ્ગુણઃ ॥ ૬૦॥

પ્રતિસર્ગજગત્કર્તા નાનાલીલાવિશારદઃ ।
ધ્રુવપ્રિયો ધ્રુવસ્વામી ચિન્તિતાધિકદાયકઃ ॥ ૬૧॥

દુર્લભાનન્તફલદો દયાનિધિરમિત્રહા ।
અઙ્ગસ્વામી કૃપાસારો વૈન્યો ભૂમિનિયામકઃ ॥ ૬૨॥

ભૂમિદોગ્ધા પ્રજાપ્રાણપાલનૈકપરાયણઃ ।
યશોદાતા જ્ઞાનદાતા સર્વધર્મપ્રદર્શકઃ ॥ ૬૩॥

પુરઞ્જનો જગન્મિત્રં વિસર્ગાન્તપ્રદર્શકઃ ।
પ્રચેતસાં પતિશ્ચિત્રભક્તિહેતુર્જનાર્દનઃ ॥ ૬૪॥

સ્મૃતિહેતુબ્રહ્મભાવસાયુજ્યાદિપ્રદઃ શુભઃ ।
વિજયી .. .. .. .. .. .. .. .. .. .. continued

## ૫ પઞ્ચમસ્કન્ધનામાનિ

### સ્થાનલીલા

.. .. સ્થિતિલીલાબ્ધિરચ્યુતો વિજયપ્રદઃ ॥ ૬૫॥

સ્વસામર્થ્યપ્રદો ભક્તકીર્તિહેતુરધોક્ષજઃ ।

પ્રિયવ્રતપ્રિયસ્વામી સ્વેચ્છાવાદવિશારદઃ ॥ ૬૬॥

સઙ્ગ્યગમ્યઃ સ્વપ્રકાશઃ સર્વસઙ્ગવિવર્જિતઃ ।
ઇચ્છાયાં ચ સમર્યાદસ્ત્યાગમાત્રોપલમ્ભનઃ ॥ ૬૭॥

અચિન્ત્યકાર્યકર્તા ચ તર્કાગોચરકાર્યકૃત્ ।
શૃઙ્ગારરસમર્યાદા આગ્નીધ્રરસભાજનમ્ ॥ ૬૮॥

નાભીષ્ટપૂરકઃ કર્મમર્યાદાદર્શનોત્સુકઃ ।
સર્વરૂપોઽદ્ભુતતમો મર્યાદાપુરુષોત્તમઃ ॥ ૬૯॥

સર્વરૂપેષુ સત્યાત્મા કાલસાક્ષી શશિપ્રભઃ ।
મેરુદેવીવ્રતફલમૃષભો ભગલક્ષણઃ ॥ ૭૦॥

જગત્સન્તર્પકો મેઘરૂપી દેવેન્દ્રદર્પહા ।
જયન્તીપતિરત્યન્તપ્રમાણાશેષલૌકિકઃ ॥ ૭૧॥

શતધાન્યસ્તભૂતાત્મા શતાનન્દો ગુણપ્રસૂઃ ।
વૈષ્ણવોત્પાદનપરઃ સર્વધર્મોપદેશકઃ ॥ ૭૨॥

પરહંસક્રિયાગોપ્તા યોગચર્યાપ્રદર્શકઃ ।
ચતુર્થાશ્રમનિર્ણેતા સદાનન્દશરીરવાન્ ॥ ૭૩॥

પ્રદર્શિતાન્યધર્મશ્ચ ભરતસ્વામ્યપારકૃત્ ।
યથાવત્કર્મકર્તા ચ સઙ્ગાનિષ્ટપ્રદર્શકઃ ॥ ૭૪॥

આવશ્યકપુનર્જન્મકર્મમાર્ગપ્રદર્શકઃ ।
યજ્ઞરૂપમૃગઃ શાન્તઃ સહિષ્ણુઃ સત્પરાક્રમઃ ॥ ૭૫॥

રહૂગણગતિજ્ઞશ્ચ રહૂગણવિમોચકઃ ।
ભવાટવીતત્ત્વવક્તા બહિર્મુખહિતે રતઃ ॥ ૭૬॥

ગયસ્વામી સ્થાનવંશકર્તા સ્થાનવિભેદકૃત્ ।
પુરુષાવયવો ભૂમિવિશેષવિનિરૂપકઃ ॥ ૭૭॥

જમ્બૂદ્વીપપતિર્મેરુનાભિપદ્મરુહાશ્રયઃ ।
નાનાવિભૂતિલીલાઢ્યો ગઙ્ગોત્પત્તિનિદાનકૃત્ ॥ ૭૮॥

ગઙ્ગામાહાત્મ્યહેતુશ્ચ ગઙ્ગારૂપોઽતિગૂઢકૃત્ ।
વૈકુણ્ઠદેહહેત્વમ્બુજન્મકૃત્ સર્વપાવનઃ ॥ ૭૯॥

શિવસ્વામી શિવોપાસ્યો ગૂઢઃ સઙ્કર્ષણાત્મકઃ ।
સ્થાનરક્ષાર્થમત્સ્યાદિરૂપઃ સર્વૈકપૂજિતઃ ॥ ૮૦॥

ઉપાસ્યનાનારૂપાત્મા જ્યોતીરૂપો ગતિપ્રદઃ ।
સૂર્યનારાયણો વેદકાન્તિરુજ્જ્વલવેષધૃક્ ॥ ૮૧॥

હંસોઽન્તરિક્ષગમનઃ સર્વપ્રસવકારણમ્ ।
આનન્દકર્તા વસુદો બુધો વાક્પતિરુજ્જ્વલઃ ॥ ૮૨॥

કાલાત્મા કાલકાલશ્ચ કાલચ્છેદકૃદુત્તમઃ ।
શિશુમારઃ સર્વમૂર્તિરાધિદૈવિકરૂપધૃક્ ॥ ૮૩॥

અનન્તસુખભોગાઢ્યો વિવરૈશ્વર્યભાજનમ્ ।
સઙ્કર્ષણો દૈત્યપતિઃ સર્વાધારો બૃહદ્વપુઃ ॥ ૮૪॥

અનન્તનરકચ્છેદી સ્મૃતિમાત્રાર્તિનાશનઃ ।
સર્વાનુગ્રહકર્તા ચ .. .. .. .. .. .. .. .. .. continued

## ૬ ષષ્ઠસ્કન્ધનામાનિ

### પોષણ-પુષ્ટિ-લીલા

.. .. .. .. .. .. .. મર્યાદાભિન્નશાસ્ત્રકૃત્ ॥ ૮૫ ॥

કાલાન્તકભયચ્છેદી નામસામર્થ્યરૂપધૃક્ ।
ઉદ્ધારાનર્હગોપ્ત્રાત્મા નામાદિપ્રેરકોત્તમઃ ॥ ૮૬॥

અજામિલમહાદુષ્ટમોચકોઽઘવિમોચકઃ ।
ધર્મવક્તાઽક્લિષ્ટવક્તા વિષ્ણુધર્મસ્વરૂપધૃક્ ॥ ૮૭॥

સન્માર્ગપ્રેરકો ધર્તા ત્યાગહેતુરધોક્ષજઃ ।
વૈકુણ્ઠપુરનેતા ચ દાસસંવૃદ્ધિકારકઃ ॥ ૮૮॥

દક્ષપ્રસાદકૃદ્ધંસગુહ્યસ્તુતિવિભાવનઃ ।
સ્વાભિપ્રાયપ્રવક્તા ચ મુક્તજીવપ્રસૂતિકૃત્ ॥ ૮૯॥

નારદપ્રેરણાત્મા ચ હર્યશ્વબ્રહ્મભાવનઃ ।
શબલાશ્વહિતો ગૂઢવાક્યાર્થજ્ઞાપનક્ષમઃ ॥ ૯૦॥

ગૂઢાર્થજ્ઞાપનઃ સર્વમોક્ષાનન્દપ્રતિષ્ઠિતઃ ।
પુષ્ટિપ્રરોહહેતુશ્ચ દાસૈકજ્ઞાતહૃદ્ગતઃ ॥ ૯૧॥

શાન્તિકર્તા સુહિતકૃત્ સ્ત્રીપ્રસૂઃ સર્વકામધુક્ ।
પુષ્ટિવંશપ્રણેતા ચ વિશ્વરૂપેષ્ટદેવતા ॥ ૯૨॥

કવચાત્મા પાલનાત્મા વર્મોપચિતિકારણમ્ ।
વિશ્વરૂપશિરશ્છેદી ત્વાષ્ટ્રયજ્ઞવિનાશકઃ ॥ ૯૩॥

વૃત્રસ્વામી વૃત્રગમ્યો વૃત્રવ્રતપરાયણઃ ।
વૃત્રકીર્તિર્વૃત્રમોક્ષો મઘવત્પ્રાણરક્ષકઃ ॥ ૯૪॥

અશ્વમેધહવિર્ભોક્તા દેવેન્દ્રામીવનાશકઃ ।
સંસારમોચકશ્ચિત્રકેતુબોધનતત્પરઃ ॥ ૯૫॥

મન્ત્રસિદ્ધિઃ સિદ્ધિહેતુઃ સુસિદ્ધિફલદાયકઃ ।
મહાદેવતિરસ્કર્તા ભક્ત્યૈ પૂર્વાર્થનાશકઃ ॥ ૯૬॥

દેવબ્રાહ્મણવિદ્વેષવૈમુખ્યજ્ઞાપકઃ શિવઃ ।
આદિત્યો દૈત્યરાજશ્ચ મહત્પતિરચિન્ત્યકૃત્ ॥ ૯૭॥

મરુતાં ભેદકસ્ત્રાતા વ્રતાત્મા પુમ્પ્રસૂતિકૃત્ ।

## ૭ સપ્તમસ્કન્ધનામાનિ

### ઊતિલીલા

કર્માત્મા વાસનાત્મા ચ ઊતિલીલાપરાયણઃ ॥ ૯૮॥

સમદૈત્યસુરઃ સ્વાત્મા વૈષમ્યજ્ઞાનસંશ્રયઃ ।
દેહાદ્યુપાધિરહિતઃ સર્વજ્ઞઃ સર્વહેતુવિદ્ ॥ ૯૯॥

બ્રહ્મવાક્સ્થાપનપરઃ સ્વજન્માવધિકાર્યકૃત્ ।
સદસદ્વાસનાહેતુસ્ત્રિસત્યો ભક્તમોચકઃ ॥ ૧૦૦॥

હિરણ્યકશિપુદ્વેષી પ્રવિષ્ટાત્માઽતિભીષણઃ ।
શાન્તિજ્ઞાનાદિહેતુશ્ચ પ્રહ્લાદોત્પત્તિકારણમ્ ॥ ૧૦૧॥

દૈત્યસિદ્ધાન્તસદ્વક્તા તપઃસાર ઉદારધીઃ ।
દૈત્યહેતુપ્રકટનો ભક્તિચિહ્નપ્રકાશકઃ ॥ ૧૦૨॥

સદ્દ્વેષહેતુઃ સદ્દ્વેષવાસનાત્મા નિરન્તરઃ ।
નૈષ્ઠુર્યસીમા પ્રહ્લાદવત્સલઃ સઙ્ગદોષહા ॥ ૧૦૩॥

મહાનુભાવઃ સાકારઃ સર્વાકારઃ પ્રમાણભૂઃ ।
સ્તમ્ભપ્રસૂતિર્નૃહરિર્નૃસિંહો ભીમવિક્રમઃ ॥ ૧૦૪॥

વિકટાસ્યો લલજ્જિહ્વો નખશસ્ત્રો જવોત્કટઃ ।
હિરણ્યકશિપુચ્છેદી ક્રૂરદૈત્યનિવારકઃ ॥ ૧૦૫॥

સિંહાસનસ્થઃ ક્રોધાત્મા લક્ષ્મીભયવિવર્ધનઃ ।
બ્રહ્માદ્યત્યન્તભયભૂરપૂર્વાચિન્ત્યરૂપધૃક્ ॥ ૧૦૬॥

ભક્તૈકશાન્તહૃદયો ભક્તસ્તુત્યઃ સ્તુતિપ્રિયઃ ।
ભક્તાઙ્ગલેહનોદ્ધૂતક્રોધપુઞ્જઃ પ્રશાન્તધીઃ ॥ ૧૦૭॥

સ્મૃતિમાત્રભયત્રાતા બ્રહ્મબુદ્ધિપ્રદાયકઃ ।
ગોરૂપધાર્યમૃતપાઃ શિવકીર્તિવિવર્ધનઃ ॥ ૧૦૮॥

ધર્માત્મા સર્વકર્માત્મા વિશેષાત્માઽઽશ્રમપ્રભુઃ ।
સંસારમગ્નસ્વોદ્ધર્તા સન્માર્ગાખિલતત્ત્વવાક્ ॥ ૧૦૯॥

આચારાત્મા સદાચારઃ .. .. .. .. .. .. .. .. ॥ continued

## ૮ અષ્ટમસ્કન્ધનામાનિ

### મન્વન્તરલીલા

.. .. .. .. .. .. .. .. .. .. .. મન્વન્તરવિભાવનઃ ।
સ્મૃત્યાઽશેષાશુભહરો ગજેન્દ્રસ્મૃતિકારણમ્ ॥ ૧૧૦॥

જાતિસ્મરણહેત્વૈકપૂજાભક્તિસ્વરૂપદઃ ।

યજ્ઞો ભયાન્મનુત્રાતા વિભુર્બ્રહ્મવ્રતાશ્રયઃ ॥ ૧૧૧॥

સત્યસેનો દુષ્ટઘાતી હરિર્ગજવિમોચકઃ ।
વૈકુણ્ઠો લોકકર્તા ચ અજિતોઽમૃતકારણમ્ ॥ ૧૧૨॥

ઉરુક્રમો ભૂમિહર્તા સાર્વભૌમો બલિપ્રિયઃ ।
વિભુઃ સર્વહિતૈકાત્મા વિષ્વક્સેનઃ શિવપ્રિયઃ ॥ ૧૧૩॥

ધર્મસેતુર્લોકધૃતિઃ સુધામાન્તરપાલકઃ ।
ઉપહર્તા યોગપતિર્બૃહદ્ભાનુઃ ક્રિયાપતિઃ ॥ ૧૧૪॥

ચતુર્દશપ્રમાણાત્મા ધર્મો મન્વાદિબોધકઃ ।
લક્ષ્મીભોગૈકનિલયો દેવમન્ત્રપ્રદાયકઃ ॥ ૧૧૫॥

દૈત્યવ્યામોહકઃ સાક્ષાદ્ગરુડસ્કન્ધસંશ્રયઃ ।
લીલામન્દરધારી ચ દૈત્યવાસુકિપૂજિતઃ ॥ ૧૧૬॥

સમુદ્રોન્મથનાયત્તોઽવિઘ્નકર્તા સ્વવાક્યકૃત્ ।
આદિકૂર્મઃ પવિત્રાત્મા મન્દરાઘર્ષણોત્સુકઃ ॥ ૧૧૭॥

શ્વાસૈજદબ્ધિવાર્વીચિઃ કલ્પાન્તાવધિકાર્યકૃત્ ।
ચતુર્દશમહારત્નો લક્ષ્મીસૌભાગ્યવર્ધનઃ ॥ ૧૧૮॥

ધન્વન્તરિઃ સુધાહસ્તો યજ્ઞભોક્તાઽઽર્તિનાશનઃ ।
આયુર્વેદપ્રણેતા ચ દેવદૈત્યાખિલાર્ચિતઃ ॥ ૧૧૯॥

બુદ્ધિવ્યામોહકો દેવકાર્યસાધનતત્પરઃ ।
સ્ત્રીરૂપો માયયા વક્તા દૈત્યાન્તઃકરણપ્રિયઃ ॥ ૧૨૦॥

પાયિતામૃતદેવાંશો યુદ્ધહેતુસ્મૃતિપ્રદઃ ।
સુમાલિમાલિવધકૃન્માલ્યવત્પ્રાણહારકઃ ॥ ૧૨૧॥

કાલનેમિશિરશ્છેદી દૈત્યયજ્ઞવિનાશકઃ ।
ઇન્દ્રસામર્થ્યદાતા ચ દૈત્યશેષસ્થિતિપ્રિયઃ ॥ ૧૨૨॥

શિવવ્યામોહકો માયી ભૃગુમન્ત્રસ્વશક્તિદઃ ।
બલિજીવનકર્તા ચ સ્વર્ગહેતુર્વ્રતાર્ચિતઃ ॥ ૧૨૩॥

અદિત્યાનન્દકર્તા ચ કશ્યપાદિતિસમ્ભવઃ ।
ઉપેન્દ્ર ઇન્દ્રાવરજો વામનબ્રહ્મરૂપધૃક્ ॥ ૧૨૪॥

બ્રહ્માદિસેવિતવપુર્યજ્ઞપાવનતત્પરઃ ।
યાચ્ઞોપદેશકર્તા ચ જ્ઞાપિતાશેષસંસ્થિતિઃ ॥ ૧૨૫॥

સત્યાર્થપ્રેરકઃ સર્વહર્તા ગર્વવિનાશકઃ ।
ત્રિવિક્રમસ્ત્રિલોકાત્મા વિશ્વમૂર્તિઃ પૃથુશ્રવાઃ ॥ ૧૨૬॥

પાશબદ્ધબલિઃ સર્વદૈત્યપક્ષોપમર્દકઃ ।
સુતલસ્થાપિતબલિઃ સ્વર્ગાધિકસુખપ્રદઃ ॥ ૧૨૭॥

કર્મસમ્પૂર્તિકર્તા ચ સ્વર્ગસંસ્થાપિતામરઃ ।
જ્ઞાતત્રિવિધધર્માત્મા મહામીનોઽબ્ધિસંશ્રયઃ ॥ ૧૨૮॥

સત્યવ્રતપ્રિયો ગોપ્તા મત્સ્યમૂર્તિધૃતશ્રુતિઃ ।
શૃઙ્ગબદ્ધધૃતક્ષોણિઃ સર્વાર્થજ્ઞાપકો ગુરુઃ ॥ ૧૨૯॥

## ૯ નવમસ્કન્ધનામાનિ

### ઈશાનુકથાલીલા

ઈશસેવકલીલાત્મા સૂર્યવંશપ્રવર્તકઃ ।
સોમવંશોદ્ભવકરો મનુપુત્રગતિપ્રદઃ ॥ ૧૩૦॥

અમ્બરીષપ્રિયઃ સાધુર્દુર્વાસોગર્વનાશકઃ ।
બ્રહ્મશાપોપસંહર્તા ભક્તકીર્તિવિવર્ધનઃ ॥ ૧૩૧॥

ઇક્ષ્વાકુવંશજનકઃ સગરાદ્યખિલાર્થદઃ ।
ભગીરથમહાયત્નો ગઙ્ગાધૌતાઙ્ઘ્રિપઙ્કજઃ ॥ ૧૩૨॥

બ્રહ્મસ્વામી શિવસ્વામી સગરાત્મજમુક્તિદઃ ।
ખટ્વાઙ્ગમોક્ષહેતુશ્ચ રઘુવંશવિવર્ધનઃ ॥ ૧૩૩॥

રઘુનાથો રામચન્દ્રો રામભદ્રો રઘુપ્રિયઃ ।
અનન્તકીર્તિઃ પુણ્યાત્મા પુણ્યશ્લોકૈકભાસ્કરઃ ॥ ૧૩૪॥

કોશલેન્દ્રઃ પ્રમાણાત્મા સેવ્યો દશરથાત્મજઃ ।

લક્ષ્મણો ભરતશ્ચૈવ શત્રુઘ્નો વ્યૂહવિગ્રહઃ ॥ ૧૩૫॥

વિશ્વામિત્રપ્રિયો દાન્તસ્તાડકાવધમોક્ષદઃ ।
વાયવ્યાસ્ત્રાબ્ધિનિક્ષિપ્તમારીચશ્ચ સુબાહુહા ॥ ૧૩૬॥

વૃષધ્વજધનુર્ભઙ્ગપ્રાપ્તસીતામહોત્સવઃ ।
સીતાપતિર્ભૃગુપતિગર્વપર્વતનાશકઃ ॥ ૧૩૭॥

અયોધ્યાસ્થમહાભોગયુક્તલક્ષ્મીવિનોદવાન્ ।
કૈકેયીવાક્યકર્તા ચ પિતૃવાક્પરિપાલકઃ ॥ ૧૩૮॥

વૈરાગ્યબોધકોઽનન્યસાત્ત્વિકસ્થાનબોધકઃ ।
અહલ્યાદુઃખહારી ચ ગુહસ્વામી સલક્ષ્મણઃ ॥ ૧૩૯॥

ચિત્રકૂટપ્રિયસ્થાનો દણ્ડકારણ્યપાવનઃ ।
શરભઙ્ગસુતીક્ષ્ણાદિપૂજિતોઽગસ્ત્યભાગ્યભૂઃ ॥ ૧૪૦॥

ઋષિસમ્પ્રાર્થિતકૃતિર્વિરાધવધપણ્ડિતઃ ।
છિન્નશૂર્પણખાનાસઃ ખરદૂષણઘાતકઃ ॥ ૧૪૧॥

એકબાણહતાનેકસહસ્રબલરાક્ષસઃ ।
મારીચઘાતી નિયતસીતાસમ્બન્ધશોભિતઃ ॥ ૧૪૨॥

સીતાવિયોગનાટ્યશ્ચ જટાયુર્વધમોક્ષદઃ ।
શબરીપૂજિતો ભક્તહનુમત્પ્રમુખાવૃતઃ ॥ ૧૪૩॥

દુન્દુભ્યસ્થિપ્રહરણઃ સપ્તતાલવિભેદનઃ ।
સુગ્રીવરાજ્યદો વાલિઘાતી સાગરશોષણઃ ॥ ૧૪૪॥

સેતુબન્ધનકર્તા ચ વિભીષણહિતપ્રદઃ ।
રાવણાદિશિરશ્છેદી રાક્ષસાઘૌઘનાશકઃ ॥ ૧૪૫॥

સીતાઽભયપ્રદાતા ચ પુષ્પકાગમનોત્સુકઃ ।
અયોધ્યાપતિરત્યન્તસર્વલોકસુખપ્રદઃ ॥ ૧૪૬॥

મથુરાપુરનિર્માતા સુકૃતજ્ઞસ્વરૂપદઃ ।
જનકજ્ઞાનગમ્યશ્ચ ઐલાન્તપ્રકટશ્રુતિઃ ॥ ૧૪૭॥

હૈહયાન્તકરો રામો દુષ્ટક્ષત્રવિનાશકઃ ।
સોમવંશહિતૈકાત્મા યદુવંશવિવર્ધનઃ ॥ ૧૪૮॥

# ૧૦ દશમસ્કન્ધપૂર્વાર્ધનામાનિ

## નિરોધલીલા

પરબ્રહ્માવતરણઃ કેશવઃ ક્લેશનાશનઃ ।
ભૂમિભારાવતરણો ભક્તાર્થાખિલમાનસઃ ॥ ૧૪૯॥

સર્વભક્તનિરોધાત્મા લીલાનન્તનિરોધકૃત્ ।
ભૂમિષ્ઠપરમાનન્દો દેવકીશુદ્ધિકારણમ્ ॥ ૧૫૦॥

વસુદેવજ્ઞાનનિષ્ઠસમજીવનિવારકઃ ।
સર્વવૈરાગ્યકરણસ્વલીલાધારશોધકઃ ॥ ૧૫૧॥

માયાજ્ઞાપનકર્તા ચ શેષસમ્ભારસમ્ભૃતિઃ ।
ભક્તક્લેશપરિજ્ઞાતા તન્નિવારણતત્પરઃ ॥ ૧૫૨॥

આવિષ્ટવસુદેવાંશો દેવકીગર્ભભૂષણમ્ ।
પૂર્ણતેજોમયઃ પૂર્ણઃ કંસાધૃષ્યપ્રતાપવાન્ ॥ ૧૫૩॥

વિવેકજ્ઞાનદાતા ચ બ્રહ્માદ્યખિલસંસ્તુતઃ ।
સત્યો જગત્કલ્પતરુર્નાનારૂપવિમોહનઃ ॥ ૧૫૪॥

ભક્તિમાર્ગપ્રતિષ્ઠાતા વિદ્વન્મોહપ્રવર્તકઃ ।
મૂલકાલગુણદ્રષ્ટા નયનાનન્દભાજનમ્ ॥ ૧૫૫॥

વસુદેવસુખાબ્ધિશ્ચ દેવકીનયનામૃતમ્ ।
પિતૃમાતૃસ્તુતઃ પૂર્વસર્વવૃત્તાન્તબોધકઃ ॥ ૧૫૬॥

ગોકુલાગતિલીલાપ્તવસુદેવકરસ્થિતિઃ ।
સર્વેશત્વપ્રકટનો માયાવ્યત્યયકારકઃ ॥ ૧૫૭॥

જ્ઞાનમોહિતદુષ્ટેશઃ પ્રપઞ્ચાસ્મૃતિકારણમ્ ।
યશોદાનન્દનો નન્દભાગ્યભૂગોકુલોત્સવઃ ॥ ૧૫૮॥

નન્દપ્રિયો નન્દસૂનુર્યશોદાયાઃ સ્તનન્ધયઃ ।

પૂતનાસુપયઃપાતા મુગ્ધભાવાતિસુન્દરઃ ॥ ૧૫૯॥

સુન્દરીહૃદયાનન્દો ગોપીમન્ત્રાભિમન્ત્રિતઃ ।
ગોપાલાશ્ચર્યરસકૃત્ શકટાસુરખણ્ડનઃ ॥ ૧૬૦॥

નન્દવ્રજજનાનન્દી નન્દભાગ્યમહોદયઃ ।
તૃણાવર્તવધોત્સાહો યશોદાજ્ઞાનવિગ્રહઃ ॥ ૧૬૧॥

બલભદ્રપ્રિયઃ કૃષ્ણઃ સઙ્કર્ષણસહાયવાન્ ।
રામાનુજો વાસુદેવો ગોષ્ઠાઙ્ગણગતિપ્રિયઃ ॥ ૧૬૨॥

કિઙ્કિણીરવભાવજ્ઞો વત્સપુચ્છાવલમ્બનઃ ।
નવનીતપ્રિયો ગોપીમોહસંસારનાશકઃ ॥ ૧૬૩॥

ગોપબાલકભાવજ્ઞશ્ચૌર્યવિદ્યાવિશારદઃ ।
મૃત્સ્નાભક્ષણલીલાસ્યમાહાત્મ્યજ્ઞાનદાયકઃ ॥ ૧૬૪॥

ધરાદ્રોણપ્રીતિકર્તા દધિભાણ્ડવિભેદનઃ ।
દામોદરો ભક્તવશ્યો યમલાર્જુનભઞ્જનઃ ॥ ૧૬૫॥

બૃહદ્વનમહાશ્ચર્યો વૃન્દાવનગતિપ્રિયઃ ।
વત્સઘાતી બાલકેલિર્બકાસુરનિષૂદનઃ ॥ ૧૬૬॥

અરણ્યભોક્તાઽપ્યથવા બાલલીલાપરાયણઃ ।
પ્રોત્સાહજનકશ્ચૈવમઘાસુરનિષૂદનઃ ॥ ૧૬૭॥

વ્યાલમોક્ષપ્રદઃ પુષ્ટો બ્રહ્મમોહપ્રવર્ધનઃ ।
અનન્તમૂર્તિઃ સર્વાત્મા જઙ્ગમસ્થાવરાકૃતિઃ ॥ ૧૬૮॥

બ્રહ્મમોહનકર્તા ચ સ્તુત્ય આત્મા સદાપ્રિયઃ ।
પૌગણ્ડલીલાભિરતિર્ગોચારણપરાયણઃ ॥ ૧૬૯॥

વૃન્દાવનલતાગુલ્મવૃક્ષરૂપનિરૂપકઃ ।
નાદબ્રહ્મપ્રકટનો વયઃપ્રતિકૃતિસ્વનઃ ॥ ૧૭૦॥

બર્હિનૃત્યાનુકરણો ગોપાલાનુકૃતિસ્વનઃ ।
સદાચારપ્રતિષ્ઠાતા બલશ્રમનિરાકૃતિઃ ॥ ૧૭૧॥

તરુમૂલકૃતાશેષતલ્પશાયી સખિસ્તુતઃ ।
ગોપાલસેવિતપદઃ શ્રીલાલિતપદામ્બુજઃ ॥ ૧૭૨॥

ગોપસમ્પ્રાર્થિતફલદાનનાશિતધેનુકઃ ।
કાલીયફણિમાણિક્યરઞ્જિતશ્રીપદામ્બુજઃ ॥ ૧૭૩॥

દૃષ્ટિસઞ્જીવિતાશેષગોપગોગોપિકાપ્રિયઃ ।
લીલાસમ્પીતદાવાગ્નિઃ પ્રલમ્બવધપણ્ડિતઃ ॥ ૧૭૪॥

દાવાગ્ન્યાવૃતગોપાલદૃષ્ટ્યાચ્છાદનવહ્નિપઃ ।
વર્ષાશરદ્વિભૂતિશ્રીર્ગોપીકામપ્રબોધકઃ ॥ ૧૭૫॥

ગોપીરત્નસ્તુતાશેષવેણુવાદ્યવિશારદઃ ।
કાત્યાયનીવ્રતવ્યાજસર્વભાવાશ્રિતાઙ્ગનઃ ॥ ૧૭૬॥

સત્સઙ્ગતિસ્તુતિવ્યાજસ્તુતવૃન્દાવનાઙ્ઘ્રિપઃ ।
ગોપક્ષુચ્છાન્તિસંવ્યાજવિપ્રભાર્યાપ્રસાદકૃત્ ॥ ૧૭૭॥

હેતુપ્રાપ્તેન્દ્રયાગસ્વકાર્યગોસવબોધકઃ ।
શૈલરૂપકૃતાશેષરસભોગસુખાવહઃ ॥ ૧૭૮॥

લીલાગોવર્ધનોદ્ધારપાલિતસ્વવ્રજપ્રિયઃ ।
ગોપસ્વચ્છન્દલીલાર્થગર્ગવાક્યાર્થબોધકઃ ॥ ૧૭૯॥

ઇન્દ્રધેનુસ્તુતિપ્રાપ્તગોવિન્દેન્દ્રાભિધાનવાન્ ।
વ્રતાદિધર્મસંસક્તનન્દક્લેશવિનાશકઃ ॥ ૧૮૦॥

નન્દાદિગોપમાત્રેષ્ટવૈકુણ્ઠગતિદાયકઃ ।
વેણુવાદસ્મરક્ષોભમત્તગોપીવિમુક્તિદઃ ॥ ૧૮૧॥

સર્વભાવપ્રાપ્તગોપીસુખસંવર્ધનક્ષમઃ ।
ગોપીગર્વપ્રણાશાર્થતિરોધાનસુખપ્રદઃ ॥ ૧૮૨॥

કૃષ્ણભાવવ્યાપ્તવિશ્વગોપીભાવિતવેષધૃક્ ।
રાધાવિશેષસમ્ભોગપ્રાપ્તદોષનિવારકઃ ॥ ૧૮૩॥

પરમપ્રીતિસઙ્ગીતસર્વાદ્ભુતમહાગુણઃ ।
માનાપનોદનાક્રન્દગોપીદૃષ્ટિમહોત્સવઃ ॥ ૧૮૪॥

ગોપિકાવ્યાપ્તસર્વાઙ્ગઃ સ્ત્રીસમ્ભાષાવિશારદઃ ।
રાસોત્સવમહાસૌખ્યગોપીસમ્ભોગસાગરઃ ॥ ૧૮૫॥

જલસ્થલરતિવ્યાપ્તગોપીદૃષ્ટ્યભિપૂજિતઃ ।
શાસ્ત્રાનપેક્ષકામૈકમુક્તિદ્વારવિવર્ધનઃ ॥ ૧૮૬॥

સુદર્શનમહાસર્પગ્રસ્તનન્દવિમોચકઃ ।
ગીતમોહિતગોપીધૃક્ષઙ્ખચૂડવિનાશકઃ ॥ ૧૮૭॥

ગુણસઙ્ગીતસન્તુષ્ટિર્ગોપીસંસારવિસ્મૃતિઃ ।
અરિષ્ટમથનો દૈત્યબુદ્ધિવ્યામોહકારકઃ ॥ ૧૮૮॥

કેશિઘાતી નારદેષ્ટો વ્યોમાસુરવિનાશકઃ ।
અક્રૂરભક્તિસંરાદ્ધપાદરેણુમહાનિધિઃ ॥ ૧૮૯॥

રથાવરોહશુદ્ધાત્મા ગોપીમાનસહારકઃ ।
હ્રદસન્દર્શિતાશેષવૈકુણ્ઠાક્રૂરસંસ્તુતઃ ॥ ૧૯૦॥

મથુરાગમનોત્સાહો મથુરાભાગ્યભાજનમ્ ।
મથુરાનગરીશોભાદર્શનોત્સુકમાનસઃ ॥ ૧૯૧॥

દુષ્ટરઞ્જકઘાતી ચ વાયકાર્ચિતવિગ્રહઃ ।
વસ્ત્રમાલાસુશોભાઙ્ગઃ કુબ્જાલેપનભૂષિતઃ ॥ ૧૯૨॥

કુબ્જાસુરૂપકર્તા ચ કુબ્જારતિવરપ્રદઃ ।
પ્રસાદરૂપસન્તુષ્ટહરકોદણ્ડખણ્ડનઃ ॥ ૧૯૩॥

શકલાહતકંસાપ્તધનૂરક્ષકસૈનિકઃ ।
જાગ્રત્સ્વપ્નભયવ્યાપ્તમૃત્યુલક્ષણબોધકઃ ॥ ૧૯૪॥

મથુરામલ્લ ઓજસ્વી મલ્લયુદ્ધવિશારદઃ ।
સદ્યઃ કુવલયાપીડઘાતી ચાણૂરમર્દનઃ ॥ ૧૯૫॥

લીલાહતમહામલ્લઃ શલતોશલઘાતકઃ ।
કંસાન્તકો જિતામિત્રો વસુદેવવિમોચકઃ ॥ ૧૯૬॥

જ્ઞાતતત્ત્વપિતૃજ્ઞાનમોહનામૃતવાઙ્મયઃ ।
ઉગ્રસેનપ્રતિષ્ઠાતા યાદવાધિવિનાશકઃ ॥ ૧૯૭॥

નન્દાદિસાન્ત્વનકરો બ્રહ્મચર્યવ્રતે સ્થિતઃ ।
ગુરુશુશ્રૂષણપરો વિદ્યાપારમિતેશ્વરઃ ॥ ૧૯૮॥

સાન્દીપનિમૃતાપત્યદાતા કાલાન્તકાદિજિત્ ।

ગોકુલાશ્વાસનપરો યશોદાનન્દપોષકઃ ॥ ૧૯૯॥

ગોપિકાવિરહવ્યાજમનોગતિરતિપ્રદઃ ।
સમોદ્ધવભ્રમરવાક્ ગોપિકામોહનાશકઃ ॥ ૨૦૦॥

કુબ્જારતિપ્રદોઽક્રૂરપવિત્રીકૃતભૂગૃહઃ ।
પૃથાદુઃખપ્રણેતા ચ પાણ્ડવાનાં સુખપ્રદઃ ॥ ૨૦૧॥

દશમસ્કન્ધોત્તરાર્ધનામાનિ નિરોધલીલા
જરાસન્ધસમાનીતસૈન્યઘાતી વિચારકઃ ।
યવનવ્યાપ્તમથુરાજનદત્તકુશસ્થલિઃ ॥ ૨૦૨॥

દ્વારકાદ્ભુતનિર્માણવિસ્માપિતસુરાસુરઃ ।
મનુષ્યમાત્રભોગાર્થભૂમ્યાનીતેન્દ્રવૈભવઃ ॥ ૨૦૩॥

યવનવ્યાપ્તમથુરાનિર્ગમાનન્દવિગ્રહઃ ।
મુચુકુન્દમહાબોધયવનપ્રાણદર્પહા ॥ ૨૦૪॥

મુચુકુન્દસ્તુતાશેષગુણકર્મમહોદયઃ ।
ફલપ્રદાનસન્તુષ્ટિર્જન્માન્તરિતમોક્ષદઃ ॥ ૨૦૫॥

શિવબ્રાહ્મણવાક્યાપ્તજયભીતિવિભાવનઃ ।
પ્રવર્ષણપ્રાર્થિતાગ્નિદાનપુણ્યમહોત્સવઃ ॥ ૨૦૬॥

રુક્મિણીરમણઃ કામપિતા પ્રદ્યુમ્નભાવનઃ ।
સ્યમન્તકમણિવ્યાજપ્રાપ્તજામ્બવતીપતિઃ ॥ ૨૦૭॥

સત્યભામાપ્રાણપતિઃ કાલિન્દીરતિવર્ધનઃ ।
મિત્રવિન્દાપતિઃ સત્યાપતિર્વૃષનિષૂદનઃ ॥ ૨૦૮॥

ભદ્રાવાઞ્છિતભર્તા ચ લક્ષ્મણાવરણક્ષમઃ ।
ઇન્દ્રાદિપ્રાર્થિતવધનરકાસુરસૂદનઃ ॥ ૨૦૯॥

મુરારિઃ પીઠહન્તા ચ તામ્રાદિપ્રાણહારકઃ ।
ષોડશસ્ત્રીસહસ્રેશઃ છત્રકુણ્ડલદાનકૃત્ ॥ ૨૧૦॥

પારિજાતાપહરણો દેવેન્દ્રમદનાશકઃ ।
રુક્મિણીસમસર્વસ્ત્રીસાધ્યભોગરતિપ્રદઃ ॥ ૨૧૧॥

રુક્મિણીપરિહાસોક્તિવાક્તિરોધાનકારકઃ ।

પુત્રપૌત્રમહાભાગ્યગૃહધર્મપ્રવર્તકઃ ॥ ૨૧૨॥

શમ્બરાન્તકસત્પુત્રવિવાહહતરુક્મિકઃ ।
ઉષાપહૃતપૌત્રશ્રીર્બાણબાહુનિવારકઃ ॥ ૨૧૩॥

શીતજ્વરભયવ્યાપ્તજ્વરસંસ્તુતષડ્ગુણઃ ।
શઙ્કરપ્રતિયોદ્ધા ચ દ્વન્દ્વયુદ્ધવિશારદઃ ॥ ૨૧૪॥

નૃગપાપપ્રભેત્તા ચ બ્રહ્મસ્વગુણદોષદૃક્ ।
વિષ્ણુભક્તિવિરોધૈકબ્રહ્મસ્વવિનિવારકઃ ॥ ૨૧૫॥

બલભદ્રાહિતગુણો ગોકુલપ્રીતિદાયકઃ ।
ગોપીસ્નેહૈકનિલયો ગોપીપ્રાણસ્થિતિપ્રદઃ ॥ ૨૧૬॥

વાક્યાતિગામિયમુનાહલાકર્ષણવૈભવઃ ।
પૌણ્ડ્રકત્યાજિતસ્પર્ધઃ કાશીરાજવિભેદનઃ ॥ ૨૧૭॥

કાશીનિદાહકરણઃ શિવભસ્મપ્રદાયકઃ ।
દ્વિવિદપ્રાણઘાતી ચ કૌરવાખર્વગર્વનુત્ ॥ ૨૧૮॥

લાઙ્ગલાકૃષ્ટનગરીસંવિગ્નાખિલનાગરઃ ।
પ્રપન્નાભયદઃ સામ્બપ્રાપ્તસન્માનભાજનમ્ ॥ ૨૧૯॥

નારદાન્વિષ્ટચરણો ભક્તવિક્ષેપનાશકઃ ।
સદાચારૈકનિલયઃ સુધર્માધ્યાસિતાસનઃ ॥ ૨૨૦॥

જરાસન્ધાવરુદ્ધેન વિજ્ઞાપિતનિજક્લમઃ ।
મન્ત્ર્યુદ્ધવાદિવાક્યોક્તપ્રકારૈકપરાયણઃ ॥ ૨૨૧॥

રાજસૂયાદિમખકૃત્ સમ્પ્રાર્થિતસહાયકૃત્ ।
ઇન્દ્રપ્રસ્થપ્રયાણાર્થમહત્સમ્ભારસમ્ભૃતિઃ ॥ ૨૨૨॥

જરાસન્ધવધવ્યાજમોચિતાશેષભૂમિપઃ ।
સન્માર્ગબોધકો યજ્ઞક્ષિતિવારણતત્પરઃ ॥ ૨૨૩॥

શિશુપાલહતિવ્યાજજયશાપવિમોચકઃ ।
દુર્યોધનાભિમાનાબ્ધિશોષબાણવૃકોદરઃ॥ ૨૨૪॥

મહાદેવવરપ્રાપ્તપુરશાલ્વવિનાશકઃ ।
દન્તવક્ત્રવધવ્યાજવિજયાઘૌઘનાશકઃ ॥ ૨૨૫॥

વિદૂરથપ્રાણહર્તા ન્યસ્તશસ્ત્રાસ્ત્રવિગ્રહઃ ।
ઉપધર્મવિલિપ્તાઙ્ગસૂતઘાતી વરપ્રદઃ ॥ ૨૨૬॥

બલ્વલપ્રાણહરણપાલિતર્ષિશ્રુતિક્રિયઃ ।
સર્વતીર્થાઘનાશાર્થતીર્થયાત્રાવિશારદઃ ॥ ૨૨૭॥

જ્ઞાનક્રિયાવિભેદેષ્ટફલસાધનતત્પરઃ ।
સારથ્યાદિક્રિયાકર્તા ભક્તવશ્યત્વબોધકઃ ॥ ૨૨૮॥

સુદામારઙ્કભાર્યાર્થભૂમ્યાનીતેન્દ્રવૈભવઃ ।
રવિગ્રહનિમિત્તાપ્તકુરુક્ષેત્રૈકપાવનઃ ॥ ૨૨૯॥

નૃપગોપીસમસ્તસ્ત્રીપાવનાર્થાખિલક્રિયઃ ।
ઋષિમાર્ગપ્રતિષ્ઠાતા વસુદેવમખક્રિયઃ ॥ ૨૩૦॥

વસુદેવજ્ઞાનદાતા દેવકીપુત્રદાયકઃ ।
અર્જુનસ્ત્રીપ્રદાતા ચ બહુલાશ્વસ્વરૂપદઃ ॥ ૨૩૧॥

શ્રુતદેવેષ્ટદાતા ચ સર્વશ્રુતિનિરૂપિતઃ ।
મહાદેવાદ્યતિશ્રેષ્ઠો ભક્તિલક્ષણનિર્ણયઃ ॥ ૨૩૨॥

વૃકગ્રસ્તશિવત્રાતા નાનાવાક્યવિશારદઃ ।
નરગર્વવિનાશાર્થહૃતબ્રાહ્મણબાલકઃ ॥ ૨૩૩॥

લોકાલોકપરસ્થાનસ્થિતબાલકદાયકઃ ।
દ્વારકાસ્થમહાભોગનાનાસ્ત્રીરતિવર્ધનઃ ॥ ૨૩૪॥

મનસ્તિરોધાનકૃતવ્યગ્રસ્ત્રીચિત્તભાવિતઃ ।

## ૧૧ એકાદશસ્કન્ધનામાનિ

### મુક્તિલીલા

મુક્તિલીલાવિહરણો મૌશલવ્યાજસંહૃતિઃ ॥ ૨૩૫॥

શ્રીભાગવતધર્માદિબોધકો ભક્તિનીતિકૃત્ ।

ઉદ્ધવજ્ઞાનદાતા ચ પઞ્ચવિંશતિધા ગુરુઃ ॥ ૨૩૬॥

આચારભક્તિમુક્ત્યાદિવક્તા શબ્દોદ્ભવસ્થિતિઃ ।
હંસો ધર્મપ્રવક્તા ચ સનકાદ્યુપદેશકૃત્ ॥ ૨૩૭॥

ભક્તિસાધનવક્તા ચ યોગસિદ્ધિપ્રદાયકઃ ।
નાનાવિભૂતિવક્તા ચ શુદ્ધધર્માવબોધકઃ ॥ ૨૩૮॥

માર્ગત્રયવિભેદાત્મા નાનાશઙ્કાનિવારકઃ ।
ભિક્ષુગીતાપ્રવક્તા ચ શુદ્ધસાઙ્ખ્યપ્રવર્તકઃ ॥ ૨૩૯॥

મનોગુણવિશેષાત્મા જ્ઞાપકોક્તપુરૂરવાઃ ।
પૂજાવિધિપ્રવક્તા ચ સર્વસિદ્ધાન્તબોધકઃ ॥ ૨૪૦॥

લઘુસ્વમાર્ગવક્તા ચ સ્વસ્થાનગતિબોધકઃ ।
યાદવાઙ્ગોપસંહર્તા સર્વાશ્ચર્યગતિક્રિયઃ ॥ ૨૪૧॥

## ૧૨ દ્વાદશસ્કન્ધનામાનિ

### આશ્રયલીલા

કાલધર્મવિભેદાર્થવર્ણનાશનતત્પરઃ ।
બુદ્ધો ગુપ્તાર્થવક્તા ચ નાનાશાસ્ત્રવિધાયકઃ ॥ ૨૪૨॥

નષ્ટધર્મમનુષ્યાદિલક્ષણજ્ઞાપનોત્સુકઃ ।
આશ્રયૈકગતિજ્ઞાતા કલ્કિઃ કલિમલાપહઃ ॥ ૨૪૩॥

શાસ્ત્રવૈરાગ્યસમ્બોધો નાનાપ્રલયબોધકઃ ।
વિશેષતઃ શુકવ્યાજપરીક્ષિજ્જ્ઞાનબોધકઃ ॥ ૨૪૪॥

શુકેષ્ટગતિરૂપાત્મા પરીક્ષિદ્દેહમોક્ષદઃ ।
શબ્દરૂપો નાદરૂપો વેદરૂપો વિભેદનઃ ॥ ૨૪૫॥

વ્યાસઃ શાખાપ્રવક્તા ચ પુરાણાર્થપ્રવર્તકઃ ।
માર્કણ્ડેયપ્રસન્નાત્મા વટપત્રપુટેશયઃ ॥ ૨૪૬॥

માયાવ્યાપ્તમહામોહદુઃખશાન્તિપ્રવર્તકઃ ।

મહાદેવસ્વરૂપશ્ચ ભક્તિદાતા કૃપાનિધિઃ ॥ ૨૪૭॥

આદિત્યાન્તર્ગતઃ કાલઃ દ્વાદશાત્મા સુપૂજિતઃ ।
શ્રીભાગવતરૂપશ્ચ સર્વાર્થફલદાયકઃ ॥ ૨૪૮॥

## માહાત્મ્યમ્

ઇતીદં કીર્તનીયસ્ય હરેર્નામસહસ્રકમ્ ।
પઞ્ચસપ્તતિવિસ્તીર્ણં પુરાણાન્તરભાષિતમ્ ॥ ૨૪૯॥

ય એતત્પ્રાતરુત્થાય શ્રદ્ધાવાન્ સુસમાહિતઃ ।
જપેદર્થાહિતમતિઃ સ ગોવિન્દપદં લભેત્ ॥ ૨૫૦॥

સર્વધર્મવિનિર્મુક્તઃ સર્વસાધનવર્જિતઃ ।
એતદ્ધારણમાત્રેણ કૃષ્ણસ્ય પદવીં વ્રજેત્ ॥ ૨૫૧॥

હર્યાવેશિતચિત્તેન શ્રીભાગવતસાગરાત્ ।
સમુદ્ધૃતાનિ નામાનિ ચિન્તામણિનિભાનિ હિ ॥ ૨૫૨॥

કણ્ઠસ્થિતાન્યર્થદીપ્ત્યા બાધન્તેઽજ્ઞાનજં તમઃ ।
ભક્તિં શ્રીકૃષ્ણદેવસ્ય સાધયન્તિ વિનિશ્ચિતમ્ ॥ ૨૫૩॥

કિમ્બહૂક્તેન ભગવાન્ નામભિઃ સ્તુતષડ્ગુણઃ ।
આત્મભાવં નયત્યાશુ ભક્તિં ચ કુરુતે દૃઢામ્ ॥ ૨૫૪॥

યઃ કૃષ્ણભક્તિમિહ વાઞ્છતિ સાધનૌઘૈર્-
નામાનિ ભાસુરયશાંસિ જપેત્સ નિત્યમ્ ।
તં વૈ હરિઃ સ્વપુરુષં કુરુતેઽતિશીઘ્રમ્-
આત્માર્પણં સમધિગચ્છતિ ભાવતુષ્ટઃ ॥ ૨૫૫॥

શ્રીકૃષ્ણ કૃષ્ણસખ વૃષ્ણિવૃષાવનિધ્રુગ્-
રાજન્યવંશદહનાનપવર્ગવીર્ય ।
ગોવિન્દ ગોપવનિતાવ્રજભૃત્યગીત
તીર્થશ્રવઃ શ્રવણમઙ્ગલ પાહિ ભૃત્યાન્ ॥ ૨૫૬॥

॥ ઇતિ શ્રીભાગવતસારસમુચ્ચયે વૈશ્વાનરોક્તં
શ્રીવલ્લભાચાર્યવિરચિતં

શ્રીપુરુષોત્તમસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

# Background Info

This sahasranAmastotra was composed by Shri Vallabhacharya. There is a short story narrated on http://sk-pushti.blogspot.com about the composition. There is an incident in the life of Shri Gopinathji, elder son of Shri Vallabhacharya, connected with his zeal towards Bhagavata Purana. It was a practice with him, right from his youth, to read Shri Bhagavata Purana regularly. He was so obsessed with its reading that he would not even eat unless he would complete Shri Bhagavata. Very much worried about this adamant attitude of Gopinathji, Shri Vallabhacharya had composed one Stotra (a poem praising the greatness) containing one thousand names of Purna Purushottama, all extracted from Shri Bhagavata Purana, and advised his son to read this work daily so that he could have the same complete effect of reading Shri Bhagavata Purana. This Purushottama Sahasranama Stotra, is one of the original works of Shri Vallabhacharya and is much venerated.

---

Proofread by Sunderh Hattangadi sunderh at hotmail.com

.. Shri Purushottamasahasranamastotra ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*